ओं सत्गुरुभ्यो नमः

## राहु स्तोत्र महामन्त्रं

-----------------------------------

अस्य श्री राहुस्तोत्र महामन्त्रस्य
वाम देव ऋषिः अनुष्टुप् छन्दः राहुर्देवता
राहुप्रसाद सिद्ध्यर्त्थे जपे विनियोगः

**कश्यप उवाचः-**

श्रुण्वन्तु मुनयः सर्व्वे
राहुप्रीतिकरं शुभं
सर्व्वरोग प्रशमनं
विषभीतिहरं परं (1)

सरवसन्पद्करं चैव
गुह्यमेतदनुत्तमं
आदरेण प्रवक्ष्यामि
श्रूयतां अवधानतः (2)

राहुः सूर्यरिपुश्चैव
विषज्वाली भयानकः
सुधांशुवैरिः श्यामात्मा
विष्णुचक्राहितो बली (3)

भुजकेशस्तीक्ष्ण दंष्ट्रः
क्रूरकर्म्मा ग्रहाधिपः
द्वादशैतानि नामानि
नित्यं यो नियतः पठेत् (4)

जप्त्वा तु प्रतिमां रम्यां
सीसजां माष संस्तितां

नीलैर् गन्धाक्षतै पुष्पैर्
भक्त्या संपूज्य यत्नतः (5)

विधिना वह्निमादाया
दूर्वान्नाज्याहुतीः क्रमात्
तन्मन्त्रेणैव जूहुयात्
यावतष्टोत्तरं शतं (6)

हुत्वैवं भक्तिमान् राहुं
प्रार्त्थयेत् ग्रहनायकं
सर्व्वापत् विनिवृत्यर्त्थं
प्राञ्जलि प्रणतो नरः (7)

राहो कराळवदन
रवि चन्द्र भयंकर
तमोरूपनमस्तुभ्यं
प्रसादं कुरु सर्व्वदा (8)

सिंहिका सुत सूर्यारि
सिद्ध गन्धर्व्व पूजित
सिंहवाहन नमस्तुभ्यं
सर्व्वान् रोगान् निवारय (9)

कृपाण पालकाहस्त
त्रिशूलिन् वरदायक
कराळाति कराळास्य
गदान् मे नाशयाखिलान् (10)

स्वर्भानो सर्प्पवदन
सुधाकर विमर्द्दन
सुरासुरवरस्तुत्य
सर्व्वदात्वं प्रसीद मे (11)

इति संप्रार्त्थितो राहुः
दुष्टस्तानगतोपि वा

सुप्रीतो जायते तस्य
सर्व्वान् रोगान् विनाशयेत् (12)

विषान्त जायते भीतिः
महारोगस्य का कथा
सर्व्वान् कामानवाप्नोति
नष्टं राज्यं अवाप्नुयात् (13)

एवं पठेदनुदिनं स्तवराजमेदं
मर्त्यः प्रसन्नहृदयो विजितेन्द्रियो यः
आरोग्यमायुरतुलं लभते सुपुत्रान्
सर्व्वे ग्रहाविषास्स्युरतिप्रसन्नाः (14)

श्री राहुस्तोत्रं सन्पूर्णं